# Shri Devanatha Prapattih

# શ્રી દેવનાથ પ્રપત્તિઃ

## Document Information

Text title : Devanatha Prapattih

File name : devanAthaprapattiH.itx

Category : vishhnu, prapatti

Location : doc_vishhnu

Author : Gopala Ayyangar

Transliterated by : TCA Venkatesan

Proofread by : TCA Venkatesan

Acknowledge-Permission: http://raghavanhema.blogspot.com/2011/03/srivaishnava-sampradhaya-books.html acharya.org

Latest update : June 3, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

# Shri Devanatha Prapattih

# શ્રી દેવનાથ પ્રપત્તિઃ

શ્રીઃ ।

શ્રીમતે રામાનુજાય નમઃ ।

શ્રીમદ્ વરવર મુનયે નમઃ ।

શ્રીમદ્ વાનમહાચલ ગુરુભ્યો નમઃ ।

અથ શ્રીદેવનાથ પ્રપત્તિઃ ।

શ્રીવરમઙ્ગામાતુઃ દિવ્યકટાક્ષ પ્રભાવપરિપૂર્ણઃ ।
શ્રીદેવનાથપાદ પયોજયુગ્મપ્રપત્તિ માકલયે ॥ ૧॥

શ્રીમત્પરાઙ્કુશમુનિર્દ્રવિડશ◌ૃતીનાં
દ્રષ્ટા પ્રપન્નકુલકૂટ વિભાસ્વરો યૌ ।
ક્ષેમઙ્કરૌ ત્રિજગતાં શરણં ગતસ્તૌ
શ્રીદેવનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૨॥

અસ્મન્મહાકુલગુરુઃ શઠકોપસૂરિઃ
યદ્ભોગ્યતાતિશય વિસ્મૃત ભિન્નવેદ્યઃ ।
શ્રીપાદુકાપદમવાપ્ય વિરાજતે તૌ
શ્રીદેવનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૩॥

દૈત્યાપહાર જલમગ્નધરોધૃતિં પ્રાક્
દેવશ્ચકાર ધૃતકોલતનુર્યદાસૌ ।
મેરુર્યદીયખુરકિઙ્કિણિવન્નનાદ
તૌ દેવનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૪॥

શ્રીશો બલેઃ કુહકવામન ભાવજુષ્ટઃ
ગત્વાધ્વરં તમવનીસુવનીપકઃ સન્ ।
યાભ્યાં ભુવં દિવમપિ ક્રમતે સ્મ પૂર્વં
તૌ દેવનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૫॥

યૌ દણ્ડકામુનિજનાનુજિઘૃક્ષયૈવ

યાત્વા તદાશ્રમપદાનિ પુરાપુનીતામ્ ।
આસાદ્ય વાનગિરિમદ્ય ચ નઃ પુનીતઃ
તૌ દેવનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૬॥

અમ્બામનુદ્રુતવતીમતિકોપનાં યૌ
અપાદ્ય વિસ્મયવશાં નિજચઙ્ક્રમેણ ।
સ્તબ્ધાં વિતેનતુરલં નવનીતચૌર્યે
તૌ દેવનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૭॥

યૌ માનસેષુ યમિનાં કમલાશુભાઙ્કે
ભાતસ્તથૈવ વરમૂર્ધનિ ચોર્ધ્વપુમ્સામ્ ।
વૃન્દાવને વ્યહરતાં ભવને ચ ગોપ્યાઃ
તૌ દેવનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૮॥

દૂત્યપ્રસઙ્ગગમને હિ પૃથાસુતાર્થે
પ્રેમાન્ધભાવશગા વચલસ્થલજ્ઞૌ ।
યૌ શમ્સતો ભગવતઃ શ્રિતવત્સલત્વં
તૌ દેવનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૯॥

વજ્રધ્વજાઙ્કુશ સુધાકલશાતપત્ર
કલ્પદ્રુમાઙ્કિતતલૌ કમનીયશોભૌ ।
દેવીકરૈરપિ ભયાદુપમૃદ્યમાનૌ
દેવાધિનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૦॥

સાયુજ્યમાપ્ય યદપાશ્રય પાદુકાભ્યાં
સર્વોત્તમઙ્ગધરણં ભજતે શઠારિઃ ।
સર્વેષ્ટદૌ હૃદયવાગતિગપ્રભાવૌ
તૌ દેવનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૧॥

યૌ તસ્થતુર્યતિપતેર્યવનાપહારે
સમ્સેવિતે ભગવતિ દ્રુતમઙ્કુમેત્ય ।
સમ્પત્સુતત્વમપિ તસ્ય સમાદધાતાં
તૌ દેવનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૨॥

શ્રીરઙ્ગધામનિ શઠારિ સહસ્રગીતેઃ
શ્રોતું ગુરોર્વિવરણં રુચિરોપયન્તુઃ ।
ગર્ભાલયાદ્ગરુડમણ્ડપમાગતૌ યૌ

તૌ દેવનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૩॥

શ્રીવેઙ્કટક્ષિતિરાદ્ગ્રવલ્લિમઙ્ગાં
શ્રીવાનશૈલમુનિના સમુપાહૃતાં યૌ ।
ઉદ્વોઢુમત્વરયુતાં વરમાશુગત્યા
તૌ દેવનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૪॥

શ્રીભૂમિભાનુવિધુદેવવધૂયુગૈશ્ચ
શ્રીમન્મૃકણ્ડુસુત ભાર્ગવવૈનતેયૈ ।
સેનાધિપતેન લસતઃ ફણિનાથભોગે
વાનાચલસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૧૫॥

સિમ્હાસને મણિમયે કમલામહિભ્યાં
દેવ્યા જગજ્જનિકયા વરમઙ્ગ્યા ચ ।
શ્રીવિષ્ણુચિત્તસુતયા ચ સમ વિભાતઃ
દેવાધિપસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૧૬॥

દેવાધિનાથપદયોઃ ગોપાલાર્યકૃતામિમામ્ ।
પ્રપત્તિં પઠતાં નિત્યં પ્રસીદતુ રમાપતિઃ ॥

॥ ઇતિ શ્રીદેવનાથપ્રપત્તિઃ સમાપ્તા ॥

*Shri Devanatha Prapattih*

pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*